## नडशादाड् ड्वलच् । (८८/१३०७)

नडशादशब्दाभ्यां ड्वलच् प्रत्ययो भवति [1]चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । [2]नड्वलम् । शाद्वलम् ॥

## शिखाया वलच् । (८९/१३०८)

शिखाशब्दात् वलच् प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । शिखावलं नाम नगरम् । मतुप्प्रकरणेऽपि शिखाया [3]वलचं (५. २. ११३/१९२०) वक्ष्यति, [4]तददेशार्थं वचनम् ॥

## उत्करादिभ्यश्छः । (९०/१३०९)

उत्कर इत्येवमादिभ्यः छः प्रत्ययो भवति चातुरर्थिकः । यथासम्भवमर्थसम्बन्धः । उत्करीयम् । [5]शफरीयम् ।

उत्कर । [6]संफल । शफर । [7]पिप्पल । पिप्पलीमूल । अश्मन् । अर्क । पर्ण । सुपर्ण । [8]खलाजिन । [8]इडा । अग्नि । तिक । कितव । आतप । [10]अनेक । पलाश । [11]तृणव । पिचुक । अश्वत्थ । [12]शकाक्षुद्र । भस्त्रा । विशाला । [13]अवरोहित । गर्त । शाल । अन्य । जन्या । अजिन । [14]मञ्च । चर्मन् । उत्क्रोश । शान्त । खदिर । [15]शूर्पणाय । श्यावनाय । [16]नैव । बक । [17]नितान्त । वृक्ष । इन्द्रवृक्ष । आर्द्रवृक्ष । अर्जुनवृक्ष । उत्करादिः ॥

## नडादीनां कुक् च । (९१/१३१०)

नड इत्येवमादीनां कुगागमो भवति, छश्च प्रत्ययश्चातुरर्थिकः । [18]यथासम्भवमर्थसम्बन्धः । नडकीयम् । प्लक्षकीयम् ।

नड । प्लक्ष । बिल्व । वेणु । वेत्र । वेतस । तृण । इक्षु । काष्ठ । कपोत । '[19]क्रुञ्चायां ह्रस्वत्वं च' (ग.सू.९२) । 'तक्षन्नलोपश्च' (ग.सू.९३) ॥

## शेषे । (९२/१३१२)

शेषे इत्यधिकारोऽयम् । [20]यानित ऊर्ध्वं [21]प्रत्ययाननुक्रमिष्यामः, [22]शेषेऽर्थे ते वेदितव्याः । [23]उपयुक्तादन्यः [24]शेषः । अपत्यादिभ्यश्चतुरर्थपर्यन्तेभ्यो[25]ऽन्योऽर्थः[26] शेषः (म.भा. २.२९१) । [27]तस्यैवंविशेषा ह्यपत्य-[28]समूहादयः, तेषु घादयो मा भूवन् इति शेषाधिकारः[29] क्रियते । किं च सर्वेषु जातादिषु[30] घादयो यथा स्युः[31] अनन्तरेणैवा[32]र्थदिशेन [33]सम्बन्धित्वेन कृतार्थता मा [34]ज्ञायि इति [35]साकल्यार्थं [36]शेषवचनम् । वक्ष्यति – '[37]राष्ट्रावारपाराद् घखौ' (४.२.९३/१३१३) [38]राष्ट्रियः । अवारपारीणः ।

---

1. चातुरर्थिकः नास्ति फ. 2. नड्वलः शाद्वलः क. 3. वलच् इति फ. 4. तदादेशार्थं क. ह. 5. सङ्कलीयम् ब, सम्पदीयम् फ, सम्फलीयम् इ. 6. सम्पद् फ, सङ्कल ब. 7. पियाल ब. 8. खलजित फ, शूलाजिन इ. 9. इडा अग्नि नास्ति क, अनितिक ह. 10. अनेक नास्ति ब, अनक क, आकण ह. 11. त्रैवर्ण फ, त्रौवण क. त्रिवण ब. 12. काशक्षुद्र इ, काशलु ब. 13. अपरोहित ब. 14. नास्ति ह. 15. नास्ति इ. 16. नैचानक ह. 17. कबन्ध क. 18. अथ इत्यधिकम् ह. 19. कुञ्चकीयम् तक्षकीयम् इ. क, क्रुञ्चाह्रस्वत्वं ब. 20. यान् प्रत्ययान् इ.ब.फ. 21. प्रत्ययान् नास्ति क. 22. शेष इत्येवं तद् वेदितव्यम् क. 23. उपर्युक्तात् ह. 24. शेषः नास्ति क. 25. यो इत्यधिकम् क. इ. फ. ब. 26. स इत्यधिकम् क.ड.फ.इ.ब. 27. तस्येदं अपत्यादयः समूहादयश्च क. 28. समूहनिकाराः फ. 29. अपि इत्यधिकम् क. 30. अर्थेषु इत्यधिकम् क. 31. इति इत्यधिकम् क. 32. अर्थनिर्देशेन ड. ह. फ. 33. सम्बन्धे ह. ब. ड, सम्बन्धेन क. 34. विज्ञायि ब. फ. क. ड. 35. साकल्यार्थे वचनम् क. 36. शेष नास्ति फ. 37. राष्ट्रपारावारात् फ. 38. राष्ट्रीयः ह.